# *Jagannath Ashtakam lyrics*

कदाचित् कालिन्दी तट विपिन सङ्गीत तरलो,मुदाभीरी नारी वदन कमला स्वाद मधुपः।

रमा शम्भु ब्रह्मामरपति गणेशार्चित पदो ,जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥ १.

भुजे सव्ये वेणुं शिरसि शिखिपिच्छं कटितटे,दुकूलं नेत्रान्ते सहचर-कटाक्षं विदधते ।

सदा श्रीमद्-वृन्दावन-वसति-लीला-परिचयो,जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ॥ २.

महाम्भोधेस्तीरे कनक रुचिरे नील शिखरे,वसन् प्रासादान्तः सहज बलभद्रेण बलिना ।

सुभद्रा मध्यस्थः सकलसुर सेवावसरदो, जगन्नाथः स्वामी नयन-पथ-गामी भवतु मे ॥ ३.

कृपा पारावारः सजल जलद श्रेणिरुचिरो ,रमा वाणी रामः स्फुरद् अमल पङ्केरुहमुखः ।

सुरेन्द्रैर् आराध्यः श्रुतिगण शिखा गीत चरितो ,जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥ ४.

रथारूढो गच्छन् पथि मिलित भूदेव पटलैः,स्तुति प्रादुर्भावम् प्रतिपदमुपाकर्ण्य सदयः ।

दया सिन्धुर्बन्धुः सकल जगतां सिन्धु सुतया,जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥ ५.

परंब्रह्मापीड़ः कुवलय-दलोत्फुल्ल-नयनो,निवासी नीलाद्रौ निहित-चरणोऽनन्त-शिरसि ।

रसानन्दी राधा-सरस-वपुरालिङ्गन-सुखो,जगन्नाथः स्वामी नयन-पथगामी भवतु मे॥ ६.

न वै याचे राज्यं न च कनक माणिक्य विभवं,न याचेऽहं रम्यां सकल जन काम्यां वरवधूम् ।

सदा काले काले प्रमथ पतिना गीतचरितो, जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥ ७.

हर त्वं संसारं द्रुततरम् असारं सुरपते,हर त्वं पापानां विततिम् अपरां यादवपते ।

अहो दीनेऽनाथे निहित चरणो निश्चितमिदं, जगन्नाथः स्वामी नयन पथ गामी भवतु मे ॥ ९.

जगन्नाथाष्टकं पुन्यं यः पठेत् प्रयतः शुचिः । सर्वपाप विशुद्धात्मा विष्णुलोकं स गच्छति

॥ इति श्रीमद शंकराचार्यविरचितं जगन्नाथाष्टकं संपूर्णम् ॥